श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चत्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चत्रिंशः सर्गः ॥

## हनुमत उत्पत्तिः शैशवावस्थायामस्य सूर्यराह्वैरावतोपर्याक्रमणमिन्द्रस्य वज्रतो मारुतेर्मूर्च्छनं मरुतो रोषात् प्राणिनां दुःखं तत्प्रसादनाय देवैः सह ब्रह्मणो वायोः पार्श्व आगमनम्

अपृच्छत तदा रामो दक्षिणाशाश्रयं मुनिम्।
प्राञ्जलिर्विनयोपेत इदमाह वचोऽर्थवत्॥ 7.35.1 ॥

अतुलं बलमेतद् वै वालिनो रावणस्य च।
न त्वेताभ्यां हनुमता समं त्विति मतिर्मम॥ 7.35.2 ॥

शौर्यं दाक्ष्यं बलं धैर्यं प्राज्ञता नयसाधनम्।
विक्रमश्च प्रभावश्च हनूमति कृतालयाः॥ 7.35.3 ॥

दृष्ट्वैव सागरं वीक्ष्य सीदन्तीं कपिवाहिनीम्।
समाश्वास्य महाबाहुर्योजनानां शतं प्लुतः॥ 7.35.4 ॥

धर्षयित्वा पुरीं लङ्कां रावणान्तःपुरं तदा।
दृष्टा सम्भाषिता चापि सीता ह्याश्वासिता तथा॥ 7.35.5 ॥

सेनाग्रगा मन्त्रिसुताः किङ्करा रावणात्मजः।
एते हनुमता तत्र एकेन विनिपातिताः॥ 7.35.6 ॥

भूयो बन्धाद् विमुक्तेन भाषयित्वा दशाननम्।
लङ्का भस्मीकृता येन पावकेनेव मेदिनी॥ **7.35.7**॥

न कालस्य न शक्रस्य न विष्णोर्वित्तपस्य च।
कर्माणि तानि श्रूयन्ते यानि युद्धे हनूमतः॥ **7.35.8**॥

एतस्य बाहुवीर्येण लङ्का सीता च लक्ष्मणः।
प्राप्ता मया जयश्चैव राज्यं मित्राणि बान्धवाः॥ **7.35.9**॥

हनूमान् यदि मे न स्याद् वानराधिपतेः सखा।
प्रवृत्तिमपि को वेत्तुं जानक्याः शक्तिमान् भवेत्॥ **7.35.10**॥

किमर्थं वाली चैतेन सुग्रीवप्रियकाम्यया।
तदा वैरे समुत्पन्ने न दग्धो वीरुधो यथा॥ **7.35.11**॥

नहि वेदितवान् मन्ये हनूमानात्मनो बलम्।
यद् दृष्टवाञ्जीवितेष्टं क्लिश्यन्तं वानराधिपम्॥ **7.35.12**॥

एतन्मे भगवन् सर्वं हनूमति महामुने।
विस्तरेण यथातत्त्वं कथयामरपूजित॥ **7.35.13**॥

राघवस्य वचः श्रुत्वा हेतुयुक्तमृषिस्ततः।
हनूमतः समक्षं तमिदं वचनमब्रवीत्॥ **7.35.14**॥

सत्यमेतद् रघुश्रेष्ठ यद् ब्रवीषि हनूमति।
न बले विद्यते तुल्यो न गतौ न मतौ परः॥ **7.35.15**॥

अमोघशापैः शापस्तु दत्तोऽस्य मुनिभिः पुरा।
न वेत्ता हि बलं सर्वं बली सन्नरिमर्दन॥ **7.35.16**॥

बाल्येऽप्येतेन यत् कर्म कृतं राम महाबल।
तन्न वर्णयितुं शक्यमिति बालतयास्यते॥ **7.35.17**॥

यदि वास्ति त्वभिप्रायः संश्रोतुं तव राघव।
समाधाय मतिं राम निशामय वदाम्यहम् ॥ **7.35.18** ॥

सूर्यदत्तवरस्वर्णः सुमेरुर्नाम पर्वतः।
यत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता ॥ **7.35.19** ॥

तस्य भार्या बभूवेष्टा अञ्जनेति परिश्रुता।
जनयामास तस्यां वै वायुरात्मजमुत्तमम् ॥ **7.35.20** ॥

शालिशूकनिभाभासं प्रासूतेमं तदाञ्जना।
फलान्याहर्तुकामा वै निष्क्रान्ता गहने वरा ॥ **7.35.21** ॥

एष मातुर्वियोगाच्च क्षुधया च भृशार्दितः।
रुरोद शिशुरत्यर्थं शिशुः शरवणे यथा ॥ **7.35.22** ॥

तदोद्यन्तं विवस्वन्तं जपापुष्पोत्करोपमम्।
ददर्श फललोभाच्च ह्युत्पपात रविं प्रति ॥ **7.35.23** ॥

बालार्काभिमुखो बालो बालार्क इव मूर्तिमान्।
ग्रहीतुकामो बालार्कं प्लवतेऽम्बरमध्यगः ॥ **7.35.24** ॥

एतस्मिन् प्लवमाने तु शिशुभावे हनूमति।
देवदानवयक्षाणां विस्मयः सुमहानभूत् ॥ **7.35.25** ॥

नाप्येवं वेगवान् वायुर्गरुडो न मनस्तथा।
यथायं वायुपुत्रस्तु क्रमतेऽम्बरमुत्तमम् ॥ **7.35.26** ॥

यदि तावच्छिशोरस्य ईदृशो गतिविक्रमः।
यौवनं बलमासाद्य कथं वेगो भविष्यति ॥ **7.35.27** ॥

तमनुप्लवते वायुः प्लवन्तं पुत्रमात्मनः।
सूर्यदाहभयाद् रक्षंस्तुषारचयशीतलः ॥ **7.35.28** ॥

बहुयोजनसाहस्रं क्रामन्नेव गतोऽम्बरम्।
पितुर्बलाच्च बाल्याच्च भास्कराभ्याशमागतः॥ **7.35.29** ॥

शिशुरेष त्वदोषज्ञ इति मत्वा दिवाकरः।
कार्यं चास्मिन् समायत्तमित्येवं न ददाह सः॥ **7.35.30** ॥

यमेव दिवसं ह्येष ग्रहीतुं भास्करं प्लुतः।
तमेव दिवसं राहुर्जिघृक्षति दिवाकरम्॥ **7.35.31** ॥

अनेन च परामृष्टो राहुः सूर्यरथोपरि।
अपक्रान्तस्ततस्त्रस्तो राहुश्चन्द्रार्कमर्दनः॥ **7.35.32** ॥

इन्द्रस्य भवनं गत्वा सरोषः सिंहिकासुतः।
अब्रवीद् भ्रुकुटिं कृत्वा देवं देवगणैर्वृतम्॥ **7.35.33** ॥

बुभुक्षापनयं दत्त्वा चन्द्रार्कौ मम वासव।
किमिदं तत् त्वया दत्तमन्यस्य बलवृत्रहन्॥ **7.35.34** ॥

अद्याहं पर्वकाले तु जिघृक्षुः सूर्यमागतः।
अथान्यो राहुरासाद्य जग्राह सहसा रविम्॥ **7.35.35** ॥

स राहोर्वचनं श्रुत्वा वासवः सम्भ्रमान्वितः।
उत्पपातासनं हित्वा उद्वहन् काञ्चनीं स्रजम्॥ **7.35.36** ॥

ततः कैलासकूटाभं चतुर्दन्तं मदस्रवम्।
शृङ्गारधारिणं प्रांशुं स्वर्णघण्टाट्टहासिनम्॥ **7.35.37** ॥

इन्द्रः करीन्द्रमारुह्य राहुं कृत्वा पुरःसरम्।
प्रायाद् यत्राभवत् सूर्यः सहानेन हनूमता॥ **7.35.38** ॥

अथातिरभसेनागाद् राहुरुत्सृज्य वासवम्।
अनेन च स वै दृष्टः प्रधावञ्शैलकूटवत्॥ **7.35.39** ॥

ततः सूर्यं समुत्सृज्य राहुं फलमवेक्ष्य च।
उत्पपात पुनर्व्योम ग्रहीतुं सिंहिकासुतम्॥ **7.35.40** ॥

उत्सृज्यार्कमिमं राम प्रधावन्तं प्लवङ्गमम्।
अवेक्ष्यैवं परावृत्तो मुखशेषः पराङ्मुखः॥ **7.35.41** ॥

इन्द्रमाशंसमानस्तु त्रातारं सिंहिकासुतः।
इन्द्र इन्द्रेति सन्त्रासान्मुहुर्मुहुरभाषत॥ **7.35.42** ॥

राहोर्विक्रोशमानस्य प्रागेवालक्षितं स्वरम्।
श्रुत्वेन्द्रोवाच मा भैषीरहमेनं निषूदये॥ **7.35.43** ॥

ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि।
फलं तं हस्तिराजानमभिदुद्राव मारुतिः॥ **7.35.44** ॥

तथास्य धावतो रूपमैरावतजिघृक्षया।
मुहूर्तमभवद् घोरमिन्द्राग्न्योरिव भास्वरम्॥ **7.35.45** ॥

एवमाधावमानं तु नातिक्रुद्धः शचीपतिः।
हस्तान्तादतिमुक्तेन कुलिशेनाभ्यताडयत्॥ **7.35.46** ॥

ततो गिरौ पपातैष इन्द्रवज्राभिताडितः।
पतमानस्य चैतस्य वामा हनुरभज्यत॥ **7.35.47** ॥

तस्मिंस्तु पतिते चापि वज्रताडनविह्वले।
चुक्रोधेन्द्राय पवनः प्रजानामहिताय सः॥ **7.35.48** ॥

प्रचारं स तु सङ्गृह्य प्रजास्वन्तर्गतः प्रभुः।
गुहां प्रविष्टः स्वसुतं शिशुमादाय मारुतः॥ **7.35.49** ॥

विण्मूत्राशयमावृत्य प्रजानां परमार्तिकृत्।
रुरोध सर्वभूतानि यथा वर्षाणि वासवः॥ **7.35.50** ॥

वायुप्रकोपाद् भूतानि निरुच्छ्वासानि सर्वतः।
सन्धिभिर्भिद्यमानैश्च काष्ठभूतानि जज्ञिरे॥ **7.35.51** ॥

निःस्वाध्यायवषट्कारं निष्क्रियं धर्मवर्जितम्।
वायुप्रकोपात् त्रैलोक्यं निरयस्थमिवाभवत्॥ **7.35.52** ॥

ततः प्रजाः सगन्धर्वाः सदेवासुरमानुषाः।
प्रजापतिं समाधावन् दुःखिताश्च सुखेच्छया॥ **7.35.53** ॥

ऊचुः प्राञ्जलयो देवा महोदरनिभोदराः।
त्वया तु भगवन् सृष्टाः प्रजा नाथ चतुर्विधाः॥ **7.35.54** ॥

त्वया दत्तोऽयमस्माकमायुषः पवनः पतिः।
सोऽस्मान् प्राणेश्वरो भूत्वा कस्मादेषोऽद्य सत्तम॥ **7.35.55** ॥

रुरोध दुःखं जनयन्नन्तःपुर इव स्त्रियः।
तस्मात् त्वां शरणं प्राप्ता वायुनोपहता वयम्॥ **7.35.56** ॥

वायुसंरोधजं दुःखमिदं नो नुद दुःखहन्।
एतत् प्रजानां श्रुत्वा तु प्रजानाथः प्रजापतिः॥ **7.35.57** ॥

कारणादिति चोक्त्वासौ प्रजाः पुनरभाषत।
यस्मिंश्च कारणे वायुश्चुक्रोध च रुरोध च॥ **7.35.58** ॥

प्रजाः शृणुध्वं तत् सर्वं श्रोतव्यं चात्मनः क्षमम्।
पुत्रस्तस्यामरेशेन इन्द्रेणाद्य निपातितः॥ **7.35.59** ॥

राहोर्वचनमास्थाय ततः स कुपितोऽनिलः।
अशरीरः शरीरेषु वायुश्चरति पालयन्॥ **7.35.60** ॥

शरीरं हि विना वायुं समतां याति दारुभिः।
वायुः प्राणः सुखं वायुर्वायुः सर्वमिदं जगत्॥ **7.35.61** ॥

वायुना सम्परित्यक्तं न सुखं विन्दते जगत्।
अद्यैव च परित्यक्तं वायुना जगदायुषा ॥ **7.35.62** ॥

अद्यैव ते निरुच्छ्वासाः काष्ठकुड्योपमाः स्थिताः।
तद् यामस्तत्र यत्रास्ते मारुतो रुक्प्रदो हि नः।
मा विनाशं गमिष्याम अप्रसाद्यादितेः सुताः ॥ **7.35.63** ॥

ततः प्रजाभिः सहितः प्रजापतिः
    सदेवगन्धर्वभुजङ्गगुह्यकैः।
जगाम तत्रास्यति यत्र मारुतः
    सुतं सुरेन्द्राभिहतं प्रगृह्य सः ॥ **7.35.64** ॥

ततोऽर्कवैश्वानरकाञ्चनप्रभं
    सुतं तदोत्सङ्गगतं सदागतेः।
चतुर्मुखो वीक्ष्य कृपामथाकरोत्
    सदेवगन्धर्वऋषियक्षराक्षसैः ॥ **7.35.65** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चत्रिंशः सर्गः ॥